॥ श्री हरिः॥

॥ श्री धर्मसम्राट् विजयते ॥

श्री करपात्रप्रिया ग्रन्थमाला

एकादश-पुष्प

प्रदोषपूजा पीयूष

प्रणेता

समर्थश्री त्र्यम्बकेश्वर चैतन्यः

प्रधान सम्पादकः

डॉ. गुणप्रकाश चैतन्यः

सम्पादकमण्डल

आचार्य हेमन्त व्यास, आचार्य राजू शर्मा, आचार्य देवेश

श्री धर्मसम्राट् प्रकाशनम्

पंजीकरण संख्या :- 201801026024418

प्रथम संस्करण :- 2019

प्रकाशन तिथि :- विक्रमी सम्वत् 2076

अग्रिम प्रकाशनार्थ सहयोग :- 20 रुपये

प्रकाशक:-

श्रीधर्मसम्राट् प्रकाशनम्

धर्मसंघ महाविद्यालय (प्रबलजी महाराज की कुटिया)

कुटिया रोड भादरा, जिला - हनुमानगढ़ (राजस्थान)

सम्पर्क-सूत्र - 9892934713, 8005500539

प्राप्तिस्थान:-

धर्मसंघ महाविद्यालय

(श्री प्रबलजी महाराज की कुटिया)

कुटिया रोड भादरा, जिला - हनुमानगढ़ (राजस्थान)

सम्पर्क-सूत्र - 9414578938, 9024357116

।। निवेदनम् ।।

कलौ हि पार्थिवीपूजा कलौ देवो महेश्वरः।
रूद्रं एकत्वं आहुः वै शाश्वतं पुराणम् (शिवाथर्वशीर्ष)

धर्म-मर्म-जिज्ञासा-परिपूर्णमानस महानुभाव! भगवानशिव को ही एक शाश्वत पुराणपुरुष कहा जाता है। भगवान शिव की महिमा, उनका भक्तवात्सल्य, उनका भोलापन, उनकी वरप्रदायकता, सर्वदेवपूज्यता विलक्षण है। श्रीकर, उपमन्यु, दधीचि, कुबेर, चंद्र, रावण, बाण से लेकर भगवान श्रीराम, श्रीकृष्ण, श्रीमन्नारायण तक उनके उपासकों के समुज्ज्वल उत्कर्षमय प्रकाश से ब्रह्मांड प्रकाशित है।

श्री रामचरित मानसकार कलिपावनावतार महात्मा तुलसीदासजी भी कहते हैं कि शिवकृपा बिना अभीष्टफल की संप्राप्ति संभव ही नहीं है चाहे कितने भी योग, यज्ञ, जप साधन कर लीजिए।

इच्छित फल बिनु शिव अवराधे।
लहहि कि कोटि जोग जप साधे।।

जब तक मनुष्य पूर्व जन्म अथवा वर्तमान जीवन में शिवोपासना द्वारा शिवकृपा अर्जित नहीं करेगा, तब तक उसे सुख शांति समृद्धि प्राप्त न होगी, सन्ताप का शमन न होगा।

न यावदुमानाथ पादारविन्दं,भजन्तीह लोके परे वा नराणाम्।
न तावत् सुखं शान्तिसन्तापनाशं,प्रसीद प्रभो सर्वभूताधिवासम्।।

बहुत समय से हार्दिक इच्छा थी कि धर्मशास्त्रीय मर्यादानुसार प्रदोषकालीन पार्थिवेश्वर शिवपूजा अथवा नित्य शिवपूजा की कोई सरलतम, सर्वजन-ग्राह्य पद्धति प्रकाशित हो ऐसा विचार चल रहा था। जिसका

सहारा लेकर भावुक शिवभक्त स्वयं को (शिवो भूत्वा शिवं यजेत् देवो भूत्वा देवं यजेत्) समतामय शिवत्व से संयुक्त कर सकें, इसलिए हमारे माननीय सम्पादक महोदय डॉ. गुणप्रकाश चैतन्यजी महाराज तथा श्री प्रणव चैतन्यजी महाराज के विशेष आग्रह तथा आचार्य देवेशजी के अति उत्साह से यह कार्य सम्पन्न होकर आपके हाथों में आया है। लेखनोपासना के इस उपक्रम से सनातन परम्परा का पोषण हो तथा सभी मनुष्य सन्मार्ग का आश्रय लेकर मानवजीवन को सार्थक करें।

इसी मंगल कामना के साथ देवाधिदेव महादेव नारायणोपास्य नारायणोपासक भगवान शिव के चरणारविन्द में शब्दप्रवाहरूपी गंगा विश्राम लेती है।

भवदीय:

त्र्यम्बकेश्वरश्चैतन्य:

विषय सूची

क्र. स.	प्रकरण	पृ. स.
१.	पार्थिव पूजा का सरल विधान	०१
२.	श्रीशिवमहिम्नः स्तोत्रम्	२३
३.	बिल्वाष्टकम्	३४
५.	शिव-अष्टोत्तरशत-नामावली	३८
६.	शिवारार्तिक्यम्	४३
४.	शिव-स्तुति	४७
७.	श्री शिव-आरती	४९
८.	प्रार्थना	५०
९.	शिवपंचकम्	५१
१०.	श्रीविश्वनाथपंचकम्	५२
११.	श्री शिव-पंचाक्षर-स्तोत्रम्	५३
१२.	शिवसहस्रनामावली	५५
१३.	विशेष-आग्रह	६८
१४.	प्रश्नोत्तर	६९

॥ श्रीहरिः॥

शिव पूजनकर्ता स्नान आदि करके शुद्ध वस्त्र (भारतीय वस्त्र यथा संभव धोती दुपट्टा) पहनकर पूजा घर में प्रवेश करें। पूजापात्र सीफ करके शुद्ध जल भरें। पुष्प, फल, चन्दन, रोली आदि पूजा सामग्री तैयार कर के पवित्र आसन पर बैठें। (धोती लांग लगाकर ही पहने, दुपट्टा ऊपर ओढें, ध्यान रहे सिले वस्त्र न पहने)

तीन आचमन- (बाएं हाथ से आचमनी में जल भरकर दाहिने हाथ में जल लेकर पियें) **ह्रीं केशवाय नमः, ह्रीं नारायणाय नमः, ह्रीं माधवाय नमः।** तदनन्तर **ह्रीं हृषीकेशाय नमः** बोलकर हाथ धो लें।

ध्यानदेने हेतु-

१-पूजनमें जिस सामग्रीकी कमी हो, उसकी पूर्ति मानसिक भावनासे करनी चाहिये- **'असम्पन्नं मनसा सम्पादयेत्'।**

जैसे- **आसनं मनसा परिकल्पयामि, पुष्पमालां मनसा परिकल्पयामि इत्यादि।**

२- दूसरा विकल्प है, उस-उस सामग्रीके लिये अक्षत-पुष्प चढ़ा दे-

तत्तद् द्रव्यं तु संकल्प्य पुष्पैर्वापि समर्चयेत्।
अर्चनेषु विहीनं यत् तत्तोयेन प्रकल्पयेत्॥

३- केवल नैवेद्य चढ़ानेसे अथवा केवल चन्दन, पुष्प चढ़ानेसे भी पूजा मान ली जाती है।

केवलनैवेद्यसमर्पणेनैव पूजासिद्धिरिति।

गन्धपुष्पसमर्पणमात्रेण पूजासिद्धिरित्यपि पूर्वे। (आचारेन्दु)

पवित्रीकरणम्- जल बाएं हाथ में लेकर दाहिने हाथ की अंगुलियो से अपने ऊपर व पूजन सामग्री पर छिड़कें, भावना करें कि इस जल से मेरा तन-मन पवित्र हो रहा है।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

आसन शुद्धि- निम्नलिखित मन्त्र उच्चारण कर अपने आसन के चारों ओर जल छिड़कें।

पृथ्वि त्वया धृता लोका देवि! त्वं विष्णुना धृता।
त्वं च धारय मां देवि! पवित्रं कुरु चासनम्॥

स्वस्ति तिलक- माथे पर भस्म, चन्दन, रोली लगायें।
(चन्दन लगाते समय अधोलिखित श्लोक बोलें)

श्रीप्रदं धीप्रदं चैव भालस्थं चन्दनं शुभम्।
शान्तिदं शक्तिदं दिव्यं तिलकं चारु धारयेत्॥

(भस्म लगाते समय अधोलिखित श्लोक बोलें)

सर्वपाप-निवृत्यर्थं पात्रता-प्राप्ति-हेतवे।
पुण्यप्रदं शिवं शुभ्रं विभूतिं धारयाम्यहम्॥

रुद्राक्षमालाधारण- रुद्राक्ष की माला को अपने गले में पहनें।

दिव्यं भव्यं पवित्रं च रुद्राक्षं धारयेत् बुधः।
रुद्राक्ष-धारणेनैव शिवतामेति मानवः॥

पवित्री धारण- दोनों हाथों में कुशा ताम्र रजत स्वर्ण या मौली की पवित्री बनाकर छोटी अंगुली के समीप वाली अनामिका अंगुली में पहन लें।

दर्भ-धातुमयं वापि पवित्रं परिकल्पयेत्।
धारयेत् धर्म-वृद्ध्यर्थं हरिस्मरण-पूर्वकम्।।

शिखा बन्धन- अपनी चोटी (शिखा) में गांठ लगावें। चोटी ना हो तो उस स्थान को स्पर्श कर लें। कुशा दूर्वा मौली शिखा स्थान पर रखें। तदनन्तर **ह्रीं नमः शिवाय** बोलकर हाथ धो लें।

दीप प्रज्वलन- (अपने सीधे हाथ की ओर गोघृत-दीप तथा अपने बाएं हाथ की ओर तैल-दीप चावल पर स्थापित कर प्रज्वलित करें। तदनन्तर **ह्रीं नमः शिवाय** बोलकर हाथ धो लें।

सूर्यार्घ्य- एक ताम्बे के लोटे में या अर्घ्यपात्र में जल, रोली, लाल पुष्प, चावल डालकर सूर्य भगवान को अर्घ्य दें। उसके बाद उस जल को नेत्रों से लगा लें।

आयुरारोग्यमैश्वर्यं ज्ञानविज्ञानसंयुतम्।
प्रदेहि सर्वदातुष्ट! अनेनार्घ्येण भास्कर!।।
ह्रीं भगवते सूर्यनारायणाय नमः अर्घ्यं समर्पयामि।

भूमिपूजनम्- भूमि पर त्रिकोण बनाकर हाथ में गन्धाक्षत-पुष्प लेकर पूजन करें।

धरा धरति धर्मज्ञं, धरा धर्म धुरी मता।

धरा धान्यप्रदा लोके धरा गोविन्दवल्लभा ॥१॥
धराधारे समृद्धा च धरा वै लोकपालिका।
क्षमाभाव-भरा माता तस्मात्तां पूजयाम्यहम् ॥२॥
आधारशक्तये नमः पूजयामि गन्धाक्षतपुष्पाणि समर्पयामि।

प्राणायाम- प्राणायाम से नाड़ीशोधन, रक्तसंचार, मन की स्थिरता व प्रसन्नता प्राप्त होती है, शरीर हल्का लगता है, आयुवृद्धि होती है। कम से कम तीन प्राणायाम अवश्य करें।

विधि- पूरा सांस नाक से धीरे-धीरे खीचें। (मुख पूरी तरह से बन्द रहे) इसे पूरक कहते हैं।

फिर यथाशक्ति परेशान हुए बिना सांस को रोके रहें। सारी नाड़ियों तक सांस जा सके। इसे कुंभक कहते हैं।

फिर धीरे-धीरे सांस को पूरा अन्त तक छोड़ें। इसे रेचक कहते हैं। यह एक प्राणायाम हुआ । इस प्रकार तीन बार प्राणायाम करें।

पूरक- सांस खींचकर भरना। (नाडी तक में सांस भर लें)

कुम्भक- सांस को यथा शक्ति रोके रखना।

रेचक- सांस को धीरे-धीरे बिना आवाज बाहर निकालना। (नाड़ी तंत्र से पूरा सांस निकालना)

5 सेकंड में पूरक, 20 सेकंड में कुम्भक, 5 सेकंड में रेचक।

हाथ जोड़ सभी देवों को प्रणाम करें।

श्री मन्महा-गणाधिपतये नमः।
श्री लक्ष्मी-नारायणाभ्यां नमः।
श्री उमा-महेश्वराभ्यां नमः।

श्री इष्ट-देवताभ्यो नमः।

श्री कुल-देवताभ्यो नमः।

श्री ग्राम-देवताभ्यो नमः।

श्री स्थान-देवताभ्यो नमः।

श्री वास्तु-देवताभ्यो नमः।

श्री मातृ-पितृ-चरण-कमलेभ्यो नमः।

श्री गुरु-चरण-कमलेभ्यो नमः।

अपने माताजी, पिताजी, गुरुजी का स्मरण करके उनको नमन करें। (समीप हों तो प्रत्यक्ष प्रणाम करें।)

मंगलश्लोकपाठ- हाथ में पुष्प लेकर मंगलश्लोकों का पाठ करें।

अविघ्नमस्तु

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यःपठेच्छृणुयादपि॥
पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः॥
अश्वथामा बलिर्व्यासो हनूमांश्च विभीषणः।
कृपः परशुरामश्च सप्तैते चिरजीविनः॥
अहल्या द्रौपदी सीता तारा मन्दोदरी तथा।

पंचकं ना स्मरेन्नित्यं महापातकनाशनम्॥
उमा उषा च वैदेही रमा गंगेति पंचकम्।
प्रातरेव पठेन्नित्यं सौभाग्यं वर्धते सदा॥
सोमनाथो वैजनाथो धन्वन्तरिरथाश्विनौ।
पंचैतान्यः स्मरेन्नित्यं व्याधिस्तस्य न बाधते॥
कपिलः कालियोऽनन्तो वासुकिस्तक्षकस्तथा।
पंचैतान्स्मरतो नित्यं विषबाधा न बाधते॥
हरं हरिं हरिश्चन्द्रं हनूमन्तं हलायुधम्।
पंचकं वै स्मरेन्नित्यं घोरसंकटनाशनम्॥
रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।
पंचैतान्संस्मरेन्नित्य भवबाधा विनिश्यति॥
सनत्कुमारदेवर्षिशुक-भीष्मप्लवंगमाः।
पंचैतान् स्मरतो नित्यं कामस्तस्य न बाधते॥
कर्कोटकस्य नागस्य दमयन्त्या नलस्य च।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम्॥
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्।
तस्य स्मरणमात्रेण गतं नष्टं च लभ्यते॥
प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान्।
रुक्मांगदार्जुनवसिष्ठविभीषणादीन्पुण्यानिमान्यरमभागवतान् स्मरामि॥
धर्मो विवर्धति युधिष्ठिरकीर्तनेन पापं प्रणश्यति वृकोदरकीर्तनेन।
शत्रुर्विनश्यति धनन्जयकीर्तनेन माद्रीसुतौ कथयतां न भवन्ति रोगाः।
काश्यां वै भैरवो देवः संसारभयनाशनः।
अनेकजन्मजं पापं स्मरणेन विनश्यति॥
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।

वन्दे काशीं गुहां गंगां भवानीं मणिकर्णिकाम्
करपात्रं कृपामूर्तिं कृष्णबोधं निरंजनम्।
माधवं प्रबलं विष्णुं शंकरं नौमि भूतये॥
सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग्भवेत्॥
मंगलं देवदेवेशो मंगलं वृषभध्वजः।
मंगलं पार्वतीनाथो मंगलं त्रिपुरान्तकः॥

हृदय को अच्छी भावना से परिपूर्ण करके शुभ संकल्प करें।
संकल्प- अर्घ्यपात्र अथवा हाथ में कुश, फल, पुष्प (पुष्प के अभाव में रंगीन चावल) अक्षत, जल, यथाभाव दक्षिणा अथवा केवल जल लेकर संकल्प करें।

श्रीविष्णुः श्रीविष्णुः श्रीविष्णुः तत् सत् अद्य श्रीमन्नारायणस्य निर्देशेन प्रवर्तमानस्य ब्रह्मणो द्वितीय-परार्धे रथन्तरादि-द्वात्रिंशत् कल्पानां मध्ये वर्तमाने अष्टमे श्री श्वेतवाराह-कल्पे स्वायम्भुवादि-चतुर्दश-मन्वन्तराणां मध्ये सप्तमे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलियुगे कलि-प्रथमचरणे जम्बुद्वीपे भरतखण्डे भगवदवतार-परिपूते भारतवर्षे (जिस राज्य में हो उस राज्य का नाम) . ..... **राज्ये** (जिस जनपद में हो उसका नाम) ..... **जनपदे** (जिस नगर में हो उस नगर का नाम) ..... **नगरे** (पौराणिक क्षेत्र या पवित्र नदी समीप हो तो उसका भी स्मरण करना चाहिए) **श्री बौद्धावतारे प्रभवादि षष्टि-संवत्सराणां मध्ये ..... संवत्सरे ..... अयने ..... ऋतौ ..... मासे ..... पक्षे ..... तिथौ ..... दिवसे ..... नक्षत्रे ..... योगे ..... करणे ..... राशि स्थिते सूर्ये ..... राशि स्थिते चन्द्रे ..... राशि स्थिते**

गुरौ (अपना गोत्र बोलें) ..... **गोत्र** (अपना नाम बोलें) ..... **नाम** (अपनी कोई मनोकामना हो तो उसे स्मरण कर लें।) ..... **मनोकामना सिद्ध्यर्थं (निष्काम-भावनया अथवा नित्य-कर्मत्वेन) श्रीसाम्बसदाशिवप्रीत्यर्थं पार्थिवलिंगपूजनम् अहं करिष्ये।**

संकल्प बोलकर अर्घ्यपात्र अथवा हाथ में रखें जल को भगवान के श्रीचरणों में अर्पित कर दें।

कर्मपात्र पूजनम्- एक जल पूरित लोटे में गन्धाक्षत-पुष्प डाल के उसे हाथ से ढक लें और सभी नदी आदि तीर्थों का उसमें आवाहन करते हुए श्लोक को पढ़े।

जले देवाः जले प्राणाः जले सर्वं प्रतिष्ठितम्।
जलाधारं महाकुम्भं तस्मात्तं पूजयाम्यहम्॥

फिर उस जल को अपने ऊपर और पूजन सामग्री पे छिड़कें।

दीप पूजनम्- गन्धाक्षत-पुष्प लेकर दीपक का पूजन करें।

पूजयामि प्रदीपस्थं दैवतं परमं शुभम्।
विघ्नध्वान्तहरं दिव्यं तैजसं कर्मसाक्षिणम्॥

दीपस्थ देवतायै नमः पूजयामि गन्धाक्षत-पुष्पाणि समर्पयामि।

पुष्प को दीपक के पास रख दें और हाथ धो लें।

भैरव नमस्कार- गन्धाक्षत-पुष्प लेकर भैरव जी का ध्यान करें।

भाग्यभूतिकरं देवं सर्वसन्तोषकारकम्।
नमामि काशिकानाथं भैरवं भयहारकम्॥

वं बटुक-भैरवाय नमः पूजयामि पुष्पं समर्पयामि।

हनुमत् पूजनम्- गन्धाक्षत-पुष्प लेकर हनुमान जी का ध्यान करें।

रामसेवाव्रताराधने तत्परं
सागरोल्लंघनं यस्य लीलाश्रितम्।
भक्तिभावान्वितं भावुकं शंकरं
अंजनानन्दनं रामदूतं भजे॥

हं हनुमते नमः पूजयामि गन्धाक्षत-पुष्पाणि समर्पयामि।

घण्टा पूजनम्- गन्धाक्षत-पुष्प लेकर गरुड़ भगवान (घण्टी) का स्मरण करें।

आगमार्थं तु देवानां गमनार्थं च रक्षसाम्।
घण्टानादं विकुर्वीत पश्चात् घण्टां प्रपूजयेत्॥१॥
शुभध्वनियुतं दिव्यं राक्षसादिनिवारकम्।
मांगलिकं समेषां वै नौमि घण्टस्थदैवतम्॥२॥
सदैव देववर्धिकां सुशान्तिसौख्यसर्जिकां
सुरार्चनाप्रसूचिकां पलायनाय रक्षसाम्।
शिवात्मिकां शुभात्मिकां सदात्मिकां चिदात्मिकां
सुघण्टिकास्थदेवतां सदा नमामि सादरम्॥३॥

घण्टस्थ-गरुड-देवतायै नमः पूजयामि गन्धाक्षत-पुष्पाणि समर्पयामि।
घण्टी को बजा दें।

शंखपूजनम्- गन्धाक्षत-पुष्प लेकर शंख का ध्यान करें।

सागरात्तु समुत्पन्नं रमायाः भ्रातरं वरम्।
दारिद्र्य दुःखहर्तारं वन्दे शंखस्थदैवतम्॥१॥
निनादजन्यसम्पदा-प्रदायकं निरन्तरं
दरिद्रताविदारकं च दैन्यदुःखदारकम्।
समुद्रवारिराशिकेलिकौशलेन संयुतं
रमानुजं शशिप्रभं सुशंखदैवतं भजे॥२॥

शंखस्थ देवतायै नमः पूजयामि गन्धाक्षत-पुष्पाणि समर्पयामि।

गुरु स्मरण- गुरुजी का स्मरण करके उनको नमन करें । (समीप हों तो प्रत्यक्ष प्रणाम करें)

यदवबोध-परायण-सन्नुतं भ्रमविकार-हरैक-गतिं परम्।
भवभयाप-हरं परमार्थदं गुरुवरांघ्रि-सरोज-रजो नुमः॥

(द्रुतविलम्बित)

शिव लिंग वनाने की विधि-(किस प्रकार शिव लिंग का निर्माण करे।)

पार्थिवेश्वर निर्माण विधि

मिट्टीका ग्रहण- **उद्धृतासि वराहेण कृष्णेन शतबाहुना।**
मृत्तिके त्वां गृह्णामि प्रजया च धनेन च॥

'ह्रीं हराय नमः' - यह मन्त्र पढ़कर मिट्टी ले। मिट्टी अच्छी तरह देखकर कंकड़ आदि निकाल दे। कम से कम **१२** ग्राम मिट्टी हो। जल मिलाकर मिट्टीको गूँथ ले।

लिंग गठन- 'ह्रीं महेश्वराय नमः' कहकर लिंगका गठन करे। यह अँगूठेसे न छोटा हो और न बित्तेसे बड़ा। मिट्टीकी नन्हींसी गोली बनाकर लिंगके ऊपर रखे। यह 'वज्र' कहलाता है। काँसा आदिके पात्रमें बिल्वपत्र रखकर उसपर निम्नलिखित मन्त्र पढ़कर लिंगकी स्थापना करे।

पार्थिवेश्वर स्थापना चित्र

पार्थिवेश्वर प्राणप्रतिष्ठा विधि -

बाएं हाथ में अक्षत लेकर दाहिने हाथ से ढ़के और यह मंत्र बोल कर शिवलिंग पर चढावें।

ह्रीं शूलपाणये नमः, हे शिव इह प्रतिष्ठितो भव।

प्राणप्रतिष्ठा मन्त्रका विनियोग- प्रतिष्ठासे पूर्व जल ग्रहणकर निम्नरूपसे विनियोग करे-

विनियोग- ह्रीं अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुःसामानिच्छन्दांसि, क्रियामयवपुः प्राणाख्या देवता आँ बींज ह्रीं शक्तिः क्रौं कीलकं देव (देवी) प्राणप्रतिष्ठापने विनियोगः

इतना कहकर जल भूमिपर छोड़ दे।

प्राणप्रतिष्ठा- हाथमें पुष्प लेकर उसे मुर्तिपर स्पर्श करते हुए नीचे लिखे मन्त्र को बोले-

ह्रीं ब्रह्मविष्णुरुद्रऋषिभ्यो नमः, शिरसि। ह्रीं ऋग्यजुःसामच्छन्दोभ्यो नमः, मुखे। ह्रीं प्राणाख्यादेवतायै नमः, हृदि। ह्रीं आँ बीजाय नमः,गुह्ये। ह्रीं ह्रीं शक्त्यै नमः,पादयोः। ह्रीं क्रौं कीलकाय नमः,सर्वाङ्गेषु।

इस प्रकार न्यास करके पुनः पार्थिव लिङ्गका स्पर्श करे-

ह्रीं आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य प्राणा इह प्राणाः।
ह्रीं आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य जीव इह स्थितः।
ह्रीं आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

आवाहनम्- अपने हृदय में स्थित भगवान की भावना करके पुष्प-अक्षत द्वारा मूर्ति में आवाहित करें।

ज्ञानविज्ञान-दातारं सर्वसम्पत् विधायकम्।
आवाहयामि विश्वेशं शिवं साम्बमहेश्वरम्॥
स्वामिन्! सर्वजगन्नाथ! यावत्पूजावसानकम्।
तावत्त्वम्प्रीतिभावेन लिंगेऽस्मिन् सन्निधिं कुरु॥

ह्रीं भूः पुरुषं साम्बसदाशिवमावाहयामि। बोलकर पुष्प-अक्षत चढावें।
ह्रीं भुवः पुरुषं साम्बसदाशिवमावाहयामि। बोलकर पुष्प-अक्षत चढावें।
ह्रीं स्वः पुरुषं साम्बसदाशिवमावाहयामि। बोलकर पुष्प-अक्षत चढावें।

विपियोग- ह्रीं अस्य श्रीशिवप ञ्चाक्षरमन्त्रस्य वामदेव ऋषिरनुष्टुप्छन्दः श्रीसदाशिवो देवता, ओङ्कारो बीजम्, नमः शक्तिः, शिवाय इति कीलकम्, मम साम्बसदाशिवप्रीत्यर्थं न्यासे पार्थिवलिङ्गपूजने विनियोगः।

- इस विनियोगसे अपने और देवताको दूर्वा अथवा कुशसे स्पर्श करते हुए तत्तद् अंगोंमें न्यास करे।

ऋष्यादिन्यास- ह्रीं वामदेवर्षये नमः, शिरसि।
ह्रीं अनुष्टुप्छन्दसे नमः,मुखे।
ह्रीं श्रीसदाशिवदेवतायै नमः, हृदि।
ह्रीं बीजाय नमः, गुह्ये।
ह्रीं शक्तये नमः,पादयोः।
ह्रीं शिवाय कीलकाय नमः,सर्वाङ्गे।
ह्रीं नं तत्पुरुषाय नमः, हृदये।
ह्रीं मं अघोराय नमः, पादयोः।
ह्रीं शिं सद्योजाताय नमः, गुह्ये।

ह्रीं वां वामदेवाय नमः, मूर्ध्नि ।
ह्रीं यं ईशानाय नमः, मुखे।

करन्यायस- **ह्रीं अङ्गुष्ठाभ्यां नमः।**
ह्रीं नं तर्जनीभ्यां नमः।
ह्रीं मं मध्यमाभ्यां नमः।
शिं अनामिकाभ्यां नमः।
वां कनिष्ठिकाभ्यां नमः।
यं करतलकरपृष्ठाभ्यां नमः।

षडङ्गन्यास- **ह्रीं हृदयाय नमः।**
ह्रीं नं शिरसे स्वाहा।
ह्रीं मं शिखायै वषट्।
ह्रीं शिं कवचाय हुम्।
ह्रीं वसं नेत्रत्रयाय वौषट्।
ह्रीं यं अस्त्राय फट्।

इस प्रकार न्यास करनेके पश्चात् भगवान् साम्बसदाशिवका ध्यानपूर्वक पूजन करे।

गणेश पूजनम्- हाथ में गन्धाक्षत-पुष्प लेकर भगवान गणेशजी का ध्यान करें।

वयं दुःख-दीनाः दयाधारहीनाः
भवाब्धौ निमग्नाः दुराचारलीनाः।
सदा शाश्वतं देवदेवं प्रजेशं
गुरुं दुःखहत्यै गणेशं नमामः॥
गं गणपतये नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

गौरी पूजनम्- गन्धाक्षत-पुष्प लेकर माँ भगवती गौरी का ध्यान करें।

सकलभुवनमध्ये वन्दनीया परा या
सुरवरमुनिपूज्या कल्पवल्ली विधात्री।
सुजनसुमनशोभासर्वसौभाग्यमूला
दनुजकुलनिहन्त्रीशाम्भवी नः पुनातु॥
गौर्यै नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

नन्दीश्वर पूजनम्- गन्धाक्षत-पुष्प लेकर नन्दीश्वर जी का ध्यान करें।

धर्मरूपं दयासिंधुं भक्तसंकल्पपूरकम्।
वन्दे नन्दीश्वरं देवं शंकरांघ्रिसमर्चकम्॥
नन्दीश्वराय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

वीरभद्र पूजनम्- गन्धाक्षत-पुष्प लेकर वीरभद्र जी का ध्यान करें।

शिवाज्ञापालकं दिव्यं दक्षाध्वरहरं हरम्।
महाबलं गणाधीशं वीरभद्रं नमाम्यहम्॥

वीरभद्राय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

स्वामी कार्तिक पूजनम्- गन्धाक्षत-पुष्प लेकर कार्तिकजी का ध्यान करें।

देवसेनापति-स्कन्दं उमाशंकर-बालकम्।
कृत्तिकापालितं देवं कार्तिकेयं नतोऽस्म्यहम्॥

कार्तिकेश्वराय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

कुबेर पूजनम्- गन्धाक्षत-पुष्प लेकर कुबेरजी का ध्यान करें।

यक्षेशेशं धनाध्यक्षं उत्तराशाधिपं प्रभुम्।
शिवपादाब्जभृंगं तं नमामि धर्मरक्षकम्॥

कुबेराय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

कीर्तिमुख पूजनम्- गन्धाक्षत-पुष्प लेकर कीर्तिमुखजी का ध्यान करें।

द्वारपालं महावीरं सुरासुरैः सुपूजितम्।
शिवाज्ञापालकं धीरं कीर्तिमुखं नमाम्यहम्॥

कीर्तिमुखाय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

नागराज पूजनम्- गन्धाक्षत-पुष्प लेकर नागराज का ध्यान करें।

धराधारं महाधीरं धर्मवर्मविधारकम्।
शिवालंकाररूपं तं सर्पराजं नमाम्यहम्॥

नागराजाय नमः ध्यानार्थे गन्धाक्षत-पुष्पाणि समर्पयामि।

शिवध्यानम्- गन्धाक्षत-पुष्प बिल्वपत्र लेकर शिवजी का ध्यान करें।

शिवाकरांघ्रिपूजितं जटाकटाहशोभितं।
सुरासुरैः विनंदितं महर्षिहर्षहर्षितम्॥
अभीष्टसिद्धिदायकं प्रसन्नताविधायकं।
समष्टिशक्तिसाधकं नमामि शंकरं प्रभुम्॥

सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय सपरिकराय अंगावरणदेवता-सहिताय सर्वदेवमयाय सर्वाभीष्टफलप्रदाय भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः ध्यानार्थे गन्धाक्षत-पुष्प-बिल्वपत्राणि समर्पयामि।

आसन- आसन के लिए हाथ में पुष्प अक्षत बिल्वपत्र लेकर भगवान को निवेदित करें। (अपने मन में भाव करें कि भगवान जी को बैठने के लिए हमने मखमल का आसन बिछाया है।)

पुष्पाक्षतमयं दिव्यं बिल्वपत्रमयं तथा।
महादेव! दयासिंधो! आसनं प्रतिगृह्यताम्॥

चिन्तामणि- पार्थिवेश्वराय नमो नमः आसनार्थे अक्षत- पुष्प-बिल्वपत्राणि समर्पयामि।

पाद्यम्- एक बार भगवान पर जल चढ़ाये। (अपने मन में भाव करें कि हम भगवान के कोमल चरणों को प्रक्षालित कर रहे हैं)

श्रीगंगादिसरिज्जन्यं पावनं सर्वतुष्टिदम्।
पादप्रक्षालनार्थाय पाद्यं स्वीकुरु शंकर॥

चिन्तामणि-पार्थिवेश्वराय नमो नमः पादयोः पाद्यं जलं समर्पयामि।

अर्घ्यम्- भगवान के करकमलों को धोने लिए जल चढ़ायें।

कर्पूरगंधसंयुक्तं पुष्पाक्षत-फलान्वितम्।
अर्घ्योदकमुरीकृत्य प्रसन्नो भव शंकर॥

चिन्तामणि-पार्थिवेश्वराय नमो नमः हस्तयोः अर्घ्यं जलं समर्पयामि।

आचमनीयं जलम्- एक बार आचमन करने के लिए जल चढ़ायें।

एलादिचूर्णसंशुद्धं शीतलं मधुरं पयः।
आचमनं कुरुस्व त्वं प्रसन्नोऽस्तु महेश्वर!॥

चिन्तामणि-पार्थिवेश्वराय नमो नमः आचमनीयं जलं समर्पयामि।

मधुपर्कम्- मधुपर्क (दही, घी, शहद का मिश्रण) भगवान को निवेदित करें।

मधु–दधि-घृताक्तं च सुमधुरं धरामृतम्।
अर्पयामि महादेव! मधुपर्कं प्रगृह्यताम्॥

सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय सपरिकराय अंगावरणदेवता-सहिताय सर्वदेवमयाय सर्वाभीष्टफलप्रदाय भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः मधुपर्कं समर्पयामि। (पुनः आचमनीय जल चढ़ायें।)

ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।

सर्वांगस्नानम्- भक्ति भाव से पूरित होकर भगवान को स्नान करायें।

तीर्थोदकेन दिव्येन सुरभितेन वारिणा।
स्नापयामि हि विश्वेश सुप्रीतो वरदो भव॥

सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय सपरिकराय अंगावरणदेवता सहिताय सर्वदेवमयाय सर्वाभीष्ट-फलप्रदाय भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः सर्वांगे स्नानीयं जलं समर्पयामि।

दुग्धस्नानम्-

मधुरं पुष्टिदं दिव्यं चंद्रश्वेतं सुधोपमम्।
भारतीयगवां दुग्धं स्नानार्थं प्रतिगृह्यताम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः गोदुग्ध-स्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः दुग्धस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

दधिस्नानम्-

शारदेन्दु समाभासं मधुराम्लं सुरप्रियम्।
दध्यामृतं गृहाण त्वं स्नानार्थं भुवनेश्वर!॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः भारतीय-वेदलक्षणायाः कामधेनु-वंशजायाः गोमातुः दुग्धनिर्मितेन दध्ना भावपूर्वकं स्नापयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः दधिस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

घृतस्नानम्-

गोनवनीत-संजातं शक्तिदं शान्तिकान्तिदम्।
हविरूपं घृतं तुभ्यं स्नानार्थम्-अर्पयाम्यहम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः भारतीय-वेदलक्षणायाः कामधेनु-वंशजायाः गोमातुः नवनीत-निर्मितेन घृतेन भावपूर्वकं स्नापयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः घृतस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

मधुस्नानम्-

पुष्प-किंजल्क-संभूतं वासंतिकमनामयम्।
पवित्रं मधु देवेश स्वीकृत्य वरदो भव॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः मधुस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः मधुस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

शर्करास्नानम्-

इक्षुसार-समुत्पन्नं शर्करां मधुरां शुभाम्।
मालिन्य-शोधनायैव स्नानार्थं स्वीकुरु प्रभो!॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः शर्करास्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः शर्करास्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

पंचामृतस्नानम्-

दुग्धं दधि घृतं क्षौद्रं शर्करादि समन्वितम्।
पंचामृतं प्रयच्छामि प्रसीद शैलजाधव!॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः पंचामृतस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः पंचामृतस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

इक्षुरस स्नानम्-

दारिद्र्य-ध्वंसकृच्छुभ्रं पौष्टिकं भूतिवर्धकम्।
इक्षुसार-समुद्भूतं रसं स्वीकुरु शंकर!॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः इक्षुरसस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः इक्षुरसस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

पुष्पोदक स्नानम् (गुलाब जल से)

दिव्यं पुष्पपरागाक्तं सौरभ्यमुपदायकम्।*
स्नानीयं हि महादेव! पुष्पोदकं समर्पये॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः पुष्पोदकस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः पुष्पोदकस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

फलोदक स्नानम् (फल के रस से)

सुपक्व-फल-संसिद्धं पावनं पुष्टिकारकम्।
शिवप्रीतिकरं नित्यम् अर्पयामि फलोदकम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः फलोदकस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः फलोदकस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

गंधोदक स्नानम् (चन्दन के जल से)

दुर्वासनाहरं स्वच्छं विशुद्धगंधसंयुतम्।
स्वीकुरु देवदेवेश! गंधोदकं सुनिर्मलम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः फलोदकस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः गंधोदकस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

विजियोदक स्नानम् (भांग से)

विशिष्टशिष्टशासनप्रथाप्रवाहपालितुं
समौषधिस्वरूपदिव्यभावभक्तिसिंचितम्।
अनंगसंगरंगरागभंजनाय पावनं
समर्पयामि भंगवारि विश्वनाथतुष्टये।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः विजियोदकस्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः विजियोदकस्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

नारिकेल जलस्नानम्-

श्रीफलजन्यमुत्कृष्टं पवित्रं पापनाशकम्।
गर्भवासनिराशाय विगर्भोदकमर्पये।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः नारिकेलगर्भोदक-स्नानं समर्पयामि।

शुद्धजल स्नान- **ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः नारिकेलगर्भोदक-स्नानान्ते स्नानीयं शुद्धोदकं समर्पयामि।**

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

इत्रोदक स्नानम्-

पुष्पसारसमुद्भूतं द्रव्यं सुपावनं शुभम्।
संस्नापयामि तेनाहं प्रसीद शिवशंकर!।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः इत्रोदकस्नानं समर्पयामि।

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

तीर्थोदक स्नानम्

पापेभ्यः त्राणकृच्छुद्धं पुण्यपाथेय-दायकम्।
पावनं पावनेभ्योऽपि तीर्थनीरं समर्पये॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः तीर्थोदकस्नानं समर्पयामि।

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

(मनोकामना पूर्ति के लिए रुद्राभिषेक में प्रयुक्त होने वाले प्रशस्त द्रव्य)

अपने कल्याण के लिये भगवान् सदाशिव की प्रसन्नता के निमित्त निष्काम भाव से यजन करना चाहिये, इसका अनन्त फल है। शास्त्रों में विविध कामनाओं की पूर्ति के लिए रुद्राभिषेक के निमित्त अनेक द्रव्यों का निर्देश हुआ है जिसे यहाँ प्रस्तुत किया जा रहा है- वृष्टि हेतु जल से, व्याधि-शान्ति हेतु कुशोदक से, पशु-सम्पदा-वृद्धि हेतु दहि से, लक्ष्मी-प्राप्ति के लिये इक्षुरस (गन्ने का रस), मोक्ष-प्राप्ति हेतु तीर्थ के जल से तथा पुत्र प्राप्ति हेतु दुध से अभिषेक करना चाहिए ।

करन्यासः-

ह्रीं नमः शिवाय हृदयाय नमः

ह्रीं नमः शिवाय शिरसे स्वाहा

ह्रीं नमः शिवाय शिखायै वषट्

ह्रीं नमः शिवाय कवचाय हुम्

ह्रीं नमः शिवाय नेत्रत्रयाय वौषट्

ह्रीं नमः शिवाय अस्त्राय फट्

शिवध्यानम्- (गन्धाक्षत-पुष्प बिल्वपत्र लेकर शिवजी का ध्यान करें।)

अकलसकलकेल्यालंकृतं लोककान्तं
अविचलतनयादृक्भाप्रसन्नं प्रशान्तम्॥
अमलमलयगंधैर्लोकमालिन्यकालं
नमति शिवमजेशं भावुको भक्तिनम्रः॥१॥

मदनकदनकर्ता लोकविश्रान्तिदाता।
प्रमथगणविभक्त्या पूजितो भाविरक्तः॥
विभवविनयविद्याशक्तिसिद्धिप्रदाता।
सुरनरमुनिपूज्यः शंकरः शं करोतु॥२॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः ध्यानार्थे गन्धाक्षत-बिल्वपत्र-पुष्पाणि समर्पयामि।

(**महाभिषेक**- गंगाजल, दुग्धधारा अथवा अन्य किसी प्रशस्त द्रव्य से भगवान का शिवमहिम्नः स्तोत्र से अभिषेक करें।)

॥ श्रीशिवमहिम्नः स्तोत्रम् ॥

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्ववर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तुव्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।

अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥५॥
अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥
त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिल-नानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥
महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति च भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥
ध्रुवं कश्चित् सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याऽध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥
तवैश्वर्यं यत्नाद् यदुपरि विरिंचो हरिरधः
परिच्छेतुं यातावनलमनलस्कन्धवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्

स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणी-रचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवा-समधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्यापातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद् ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयो-
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा
विधेयस्याऽऽसीद्यस्त्रिनयनविषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः ॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥१५॥

महीपादाघाताद् व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्-भुजपरिघरुग्ण-ग्रह-गणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृत-जटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥
वियद्व्यापी तारागणगुणित-फेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥
रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथांगे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बर विधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥
हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥
क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदान-प्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥२०॥
क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता

मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥
प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्-भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥
स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥
श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराः
चिता-भस्मालेपः स्रगपि नृकरोटी-परिकरः ।
अमंगल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मंगलमसि ॥२४॥
मनः प्रत्यक् चित्ते सविधमविधायात्त-मरुतः
प्रहृष्यद्रोमाणः प्रमद-सलिलोत्संगित-दृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥२५॥
त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।

परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥
त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत् तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥
भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन् प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रविहित-नमस्योऽस्मि भवते ॥२८॥
नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥२९॥
बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥
कृशपरिणति-चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुण-सीमोल्लंघिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्

वरद चरणयोस्ते वाक्य-पुष्पोपहारम् ॥३१॥

असित-गिरि-समं स्यात् कज्जलं सिन्धु-पात्रे
सुर-तरुवर-शाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

असुर-सुर-मुनीन्द्रैरर्चितस्येन्दु-मौले-
र्ग्रथित-गुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकल-गुण-वरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्ध-चित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतर-धनायुः पुत्रवान् कीर्तिमांश्च ॥३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥३५॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नः स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६॥

कुसुमदशन-नामा सर्व-गन्धर्व-राजः
शिशुशशिधर-मौलेर्देवदेवस्य दासः ।
स खलु निज-महिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद् दिव्य-दिव्यं महिम्नः ॥३७॥

सुरवरमुनिपूज्यं स्वर्ग-मोक्षैक-हेतुं
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८॥
आसमाप्तमिदं स्तोत्रं पुण्यं गन्धर्व-भाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥३९॥
इत्येषा वाङ्मयी पूजा श्रीमच्छङ्कर-पादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४०॥
तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर ।
यादृशोऽसि महादेव तादृशाय नमो नमः ॥४१॥
एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपाप-विनिर्मुक्तः शिव लोके महीयते ॥४२॥
श्रीपुष्पदन्त-मुख-पंकज-निर्गतेन
स्तोत्रेण किल्बिष-हरेण हर-प्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥४३॥

॥ श्रीशिवमहिम्नः स्तोत्रं सदा शिवार्पणमस्तु ॥

नीचे लिखे वाक्यों को बोलते हुए अभिषेक के जल को अपने ऊपर छिड़कें।

दु:ख हर, दारिद्र्य हर, दौर्मनस्य हर, दौर्भाग्य हर, दौर्बल्य हर, कण्टक हर, अमंगल हर, सर्व सौभाग्य कर, हर हर महादेव।

उत्तरन्यासः-

ह्रीं नमः शिवाय हृदयाय नमः, ह्रीं नमः शिवाय शिरसे स्वाहा

ह्रीं नमः शिवाय शिखायै वषट् , ह्रीं नमः शिवाय कवचाय हुम्

ह्रीं नमः शिवाय नेत्रत्रयाय वौषट् , ह्रीं नमः शिवाय अस्त्राय फट्

शिवध्यानम्-

करुणावरुणालयलीनमतिं भवतापनिवारणशीलगतिम्॥

अभिषेकविधाविधिहीनजनाः प्रणमन्ति सदा शिवमेकगुरुम्॥

शिवशिवशिवशम्भो पाहि संसारपापात्।

हर हर हर देवो दुःखदारिद्र्यदाहात्॥

भव भव मम नाथो विश्वनाथो महोक्षः।

जनिमरणकुचक्राद् रक्ष रक्षाधिपेशः॥

शुद्धोदकस्नानम्- (भगवान को शुद्ध जल से स्नान करायें।)

ह्रीं नमः शिवाय सर्वाभीष्ट-फलप्रदाय सपरिकराय भगवते साम्बसदाशिवाय पार्थिवेश्वराय नमो नमः शुद्धोदकस्नानीयं जलं सर्पयामि।

(संकीर्तन करे)

महादेवं महादेवं महादेवं भजाम्यहम्।

महादेवं महादेवं महादेवं स्मराम्यहम्।।

अंग प्रोक्षणम्- शुद्ध कोमल वस्त्र से भगवान को पोंछें।

पुष्पेण मृदुवस्त्रेण शोषयेत् वारि तत्परः।
यथात्मदेहसेवास्ति देवानांच ततोधिकम्।।

वस्त्रम्-

आच्छादकं शरीरस्य लज्जायाश्च विरक्षकम्।
कार्पासनिर्मितं शुद्धं वस्त्रं तद्धि समर्पये।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः वस्त्रं समर्पयामि।

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

यज्ञोपवीतम्-

द्विजत्व-साधकं शुद्धं दिव्यं यज्ञप्रवर्तकम्।
ब्रह्मसूत्रं सुरैर्युक्तं यज्ञोपवीतमर्पये।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः यज्ञोपवीतं समर्पयामि।

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

उपवस्त्रम्-

उत्तरीयं महद्दिव्यं शास्त्राचार-प्रवाहकम्।
श्रद्धासिक्तान्तरोहं वै उपवस्त्रं समर्पये।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः उपवस्त्रं समर्पयामि।

आचमनीय जल- **ह्रीं नमः शिवाय आचमनीयं जलं समर्पयामि।**

भस्म-

सर्वाघमर्दकं दिव्यं विभूत्याभा-विधायकम्।
सुगंधिद्रव्य-संयुक्तं भस्म समर्पयामि भो॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः भस्म विलेपयामि।

चन्दनम्-

सर्वतापहरं दिव्यं सर्वथाघहरं परम्।
सर्वसौगन्ध्य संयुक्तं चन्दनं प्रतिगृह्यताम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः चन्दनं विलेपयामि।

अक्षतम्-

देवप्रियान् शुभान् शुभ्रान् कुंकुमाक्तानखंडितान्।
श्रद्धान्वितानिमान् पुण्यान् अक्षतानर्पयामि भो॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः अलंकरणार्थान अक्षतान् समर्पयामि।

पुष्पम्-

सुगन्धीनि विभिन्नानि देवानन्दकराणि च।

पूजार्थानि सुदिव्यानि पुष्पाणि प्रतिगृह्यताम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः पूजार्थानि पुष्पाणि
समर्पयामि।

पुष्पमालाम्-

दिव्यशोभाभरां भव्यां सम्पदावृद्धिकारिकाम्।
दर्पदोष-निराशाय पुष्पमालां समर्पये ॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः पुष्पमालां समर्पयामि।

बिल्वपत्रम्-

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुतम्।
त्रिजन्मपापसंहारं बिल्वपत्रं शिवार्पणम्॥१॥
दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम्।
अघोरपापसंकाशं बिल्वपत्रं शिवार्पणम्॥२॥
त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः।
तव पूजां करिष्यामि गृहाण परमेश्वर!॥३॥
श्रीवृक्षामृत-सम्भूतं शंकरस्य सदाप्रियम्।
पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वर!॥४॥
बिल्वमूले महादेवी स्तम्भे देवो महेश्वरः।
भवानीभवभूतं वै पत्रं स्वीकुरु शंकर!॥५॥
श्रीप्रदं सर्वदं सिद्धं सर्वसौभाग्यकारकम्।
पापतापविनाशाय बिल्वपत्रं शिवार्पणम्॥६॥

दोषत्रय-विघाताय रागद्वेषनिवर्तकम्।
सर्वमंगलमूलं वै बिल्वपत्रं शिवार्पणम्॥७॥
स्वर्णराशि-समायुक्तं निर्जराणामतिप्रियम्।
सर्वकाम- समृद्ध्यर्थं बिल्वपत्रं शिवार्पणम्॥८॥
समत्वा पादकं सूत्रं शिवप्रीति-प्रदायकम्।
प्राकृतं प्रकृतेः मूलं बिल्वपत्रं शिवार्पणम्॥९॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः अखण्डबिल्वपत्राणि समर्पयामि।

दूर्वाम्- (दूर्वति हिनस्ति रोगान् अनिष्टान् कल्मषानि इति दूर्वा)

दुर्वासना-निहन्तारं पीयूषासव-दायकम्।
त्रिकाण्डं मंगलाकारं दूर्वांकुरं समर्पये॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः सुकोमलान स्वच्छान् हरितदूर्वांकुरान् समर्पयामि।

शमीपत्रम्- (शमयति शोकादिकमिति शमी)

अमंगल निहन्त्रीं वै निहन्त्रीं दुष्कृतस्य च।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः शमीपत्राणि समर्पयामि।

श्वेतार्कपुष्पम्- (मंद्यते=स्तूयते प्रशस्यते इति मंदारः)

श्वेतं श्वेतार्क-पुष्पं वै आयुष्याऽरोग्य-वर्धकम्।

शम्भुप्रियं प्रभायुक्तं मन्दारमर्पयाम्यहम्।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः श्वेतार्कपुष्पं समर्पयामि।

धत्तूरपुष्पं फलम् च- (धयति पिबति सर्वधातूनिति)

मादकं मोदकं मुख्यं महाभैषजरुपकम्।
विकसितं फलं पुष्पं धत्तूरमर्पयामि वै।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः धत्तूरपुष्पं फलं च समर्पयामि।

विजयाम्-

विजयां भक्तिदां पुण्यामौदार्य-भाववर्धिनीम्।
औदासीन्यप्रदां भद्रां विजयामर्पये शिव!।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः विजयापत्रं च समर्पयामि।

तुलसीमंजरीम्-

शोकसन्तापहर्त्रीं च मंजुलां मंजरीं शुभां।
गृहाण देवदेवेश! प्रयच्छामि प्रयत्नतः।।

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः तुलसीमंजरीं समर्पयामि।

सिन्दूरम्-

सिन्दूरं शोभनं शुद्धं सौभाग्यं सुखवर्द्धनम्।
शुभदं चैव मांगल्यं सिन्दूरं प्रतिगृह्यताम्॥
भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः सौभाग्य-सिन्दूरं समर्पयामि।

नानापरिमलद्रव्याणि- (अबीर गुलाल आदि)
अबीरं च गुलालं च हरिद्रादिसमन्वितम्।
नानापरिमलं द्रव्यं गृहाण परमेश्वर!॥
भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः नानापरिमलद्रव्याणि समर्पयामि।

सुगन्धितद्रव्यम्- (इत्र)
पुष्पसार-समुद्भूतमाह्लादकमनामयम्।
हृदयाकर्षकं शंभो! गृहाण शिवशंकर!॥
भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः सुगन्धितद्रव्यं समर्पयामि।

अंगपूजनम्- गन्ध, अक्षत, पुष्प आदि से भगवान शिव की अंग पूजा करें।
01. ह्रीं ईशानाय नमः पादौ पूजयामि।
02. ह्रीं शङ्कराय नमः जंघे पूजयामि।
03. ह्रीं शूलपाणये नमः गुल्फौ पूजयामि।
04. ह्रीं शम्भवे नमः कटिं पूजयामि।
05. ह्रीं स्वयम्भुवे नमः गुह्यं पूजयामि।
06. ह्रीं महादेवाय नमः नाभिं पूजयामि।

07. ह्रीं विश्वकर्त्रे नमः उदरं पूजयामि।
08. ह्रीं सर्वतोमुखाय नमः पार्श्वे पूजयामि।
09. ह्रीं स्थाणवे नमः स्तनौ पूजयामि।
10. ह्रीं नीलकण्ठाय नमः कण्ठं पूजयामि।
11. ह्रीं शिवात्मने नमः मुखं पूजयामि।
12. ह्रीं त्रिनेत्राय नमः नेत्रे पूजयामि।
13. ह्रीं नागभूषणाय नमः शिरः पूजयामि।
14. ह्रीं देवाधिदेवाय नमः सर्वांगं पूजयामि।

आवरणपूजनम्-

१. ह्रीं अघोराय नमः।
२. ह्रीं पशुपतये नमः।
३. ह्रीं शिवाय नमः।
४. ह्रीं विरूपाय नमः।
५. ह्रीं विश्वरूपाय नमः।
६. ह्रीं त्र्यम्बकाय नमः।
७. ह्रीं भैरवाय नमः।
८. ह्रीं कपर्दिने नमः।
९. ह्रीं शूलपाणये नमः।
१०. ह्रीं ईशानाय नमः।
११. ह्रीं महेशाय नमः।

एकादशशक्तिपूजनम्-

१. ह्रीं उमायै नमः।
२. ह्रीं शंकरप्रियायै नमः।
३. ह्रीं पार्वत्यै नमः।
४. ह्रीं गौर्यै नमः।
५. ह्रीं काटिव्यै नमः।
६. ह्रीं कालिन्द्यै नमः।
७. ह्रीं कोटर्यै नमः।
८. ह्रीं विश्वधारिण्यै नमः।
९. ह्रीं विश्वमात्रे नमः।
१०. ह्रीं भगवत्यै नमः।
११. ह्रीं विश्वेश्वर्यै नमः।

गणपूजनम्-

१. ह्रीं गणपतये नमः।	**२. ह्रीं कार्तिकेयाय नमः।**
३. ह्रीं पुष्पदन्ताय नमः।	**४. ह्रीं कपर्दिने नमः।**
५. ह्रीं भैरवाय नमः।	**६. ह्रीं शूलपाणये नमः।**
७. ह्रीं ईश्वराय नमः।	**८. ह्रीं दण्डपाणये नमः।**
९. ह्रीं नन्दिने नमः।	**१०. ह्रीं महाकालाय नमः।**

अष्टोत्तरशतनामभिः शिवार्चनम्- शिवजी के 108 नामों से पुष्प, अक्षत, बिल्वपत्र, कमलपुष्प, बादाम, काजू, द्राक्षा, दक्षिणा द्रव्य आदि से पूजन करें।

विनियोग- अस्य श्रीशिवाष्टोत्तरशतनाममंत्रस्य नारायणऋषिः अनुष्टुप् छन्दः श्रीसदाशिवो देवता गौरी उमाशक्तिः श्रीसाम्बसदाशिवप्रीतये अष्टोत्तरशतनामभिः शिवपूजने विनियोगः।

ध्यानम्-

शान्ताकारं शिखरिशयनं नीलकण्ठं सुरेशं
विश्वाधारं स्फटिकसदृशं शुभ्रवर्णं शुभाङ्गम्।
गौरीकान्तं त्रितयनयनं योगिभिर्ध्यानगम्यं
वन्दे शम्भुं भवभयहरं सर्वलोकैकनाथम्॥

1. ह्रीं शिवाय नमः	2. ह्रीं महेश्वराय नमः	3. ह्रीं शम्भवे नमः
4. ह्रीं पिनाकिने नमः	5. ह्रीं शशिशेखराय नमः	6. ह्रीं वामदेवाय नमः
7. ह्रीं विरूपाक्षाय नमः	8. ह्रीं कपर्दिने नमः	9. ह्रीं नीललोहिताय नमः
10. ह्रीं शंकराय नमः	11. ह्रीं शूलपाणये नमः	12. ह्रीं खट्वाङ्गिने नमः

13. ह्रीं विष्णुवल्लभाय नमः 14. ह्रीं शिपिविष्टाय नमः 15. ह्रीं अम्बिकानाथाय नम
16. ह्रीं श्रीकण्ठाय नमः 17. ह्रीं भक्तवत्सलाय नमः 18. ह्रीं भवाय नमः
19. ह्रीं शर्वाय नमः 20. ह्रीं त्रिलोकीनाथाय नमः 21. ह्रीं शितिकण्ठाय नमः
22.ह्रीं शिवाप्रियाय नमः 23. ह्रीं उग्राय नमः 24. ह्रीं कपालिने नमः
25. ह्रीं कामारये नमः 26. ह्रीं अन्धकासुरसूदनाय नमः 27. ह्रीं गंगाधराय नमः
28.ह्रीं ललाटाक्षाय नमः 29. ह्रीं कालकालाय नमः 30. ह्रीं कृपानिधये नमः
31. ह्रीं भीमाय नमः 32. ह्रीं परशुहस्ताय नमः 33. ह्रीं मृगपाणये नमः
34. ह्रीं जटाधराय नमः 35. ह्रीं कैलाशवासिने नमः 36. ह्रीं कवचिने नमः
37. ह्रीं कठोराय नमः 38. ह्रीं त्रिपुरान्तकाय नमः 39. ह्रीं वृषाङ्काय नमः
40.ह्रीं वृषभारूढाय नमः 41. ह्रीं भस्मोद्धूलितविग्रहाय नमः 42. ह्रीं सामप्रियाय नमः
43. ह्रीं स्वरमयाय नमः 44. ह्रीं त्रिमूर्तये नमः 45. ह्रीं अश्विनीश्वराय नमः
46. ह्रीं सर्वज्ञाय नमः 47. ह्रीं परमात्मने नमः 48. ह्रीं सोमसूर्य्याग्नि लोचनाय नमः
49. ह्रीं हविषे नमः 50. ह्रीं यज्ञमयाय नमः 51. ह्रीं पचवक्त्राय नमः
52. ह्रीं सदाशिवाय नमः 53. ह्रीं विश्वेश्वराय नमः 54. ह्रीं वीरभद्राय नमः
55. ह्रीं गणनाथाय नमः 56. ह्रीं प्रजापतये नमः 57. ह्रीं हिरण्यरेतसे नमः
58. ह्रीं दुर्द्धर्षाय नमः 59. ह्रीं गिरीशाय नमः 60. ह्रीं गिरिशाय नमः
61. ह्रीं अनघाय नमः 62. ह्रीं भुजंगभूषणाय नमः 63. ह्रीं भर्गाय नमः
64. ह्रीं गिरिन्धन्वने नमः 65. ह्रीं गिरिप्रियाय नमः 66. ह्रीं अष्टमूर्तये नमः
67. ह्रीं अनेकात्मने नमः 68. ह्रीं सात्विकाय नमः 69. ह्रीं शुभविग्रहाय नमः
70. ह्रीं शाश्वताय नमः 71. ह्रीं खण्डपरशवे नमः 72. ह्रीं अजाय नमः
73. ह्रीं पाशविमोचकाय नमः 74. ह्रीं कृत्तिवाससे नमः 75. ह्रीं पुरारातये नमः
76. ह्रीं भगवते नमः 77. ह्रीं प्रमथाधिपाय नमः 78. ह्रीं मृत्युंजयाय नमः
79. ह्रीं सूक्ष्मतनवे नमः 80. ह्रीं जगद्व्यापिने नमः 81. ह्रीं जगद्गुरवे नमः
82. ह्रीं जनकाय नमः 83. ह्रीं चारूविक्रमाय नमः 84. ह्रीं रुद्राय नमः
85. ह्रीं भूतपतये नमः 86. ह्रीं स्थाणवे नमः 87. ह्रीं अहिर्बुध्न्याय नमः
88. ह्रीं दिगम्बराय नमः 89. ह्रीं मृडाय नमः 90. ह्रीं पशुपतये नमः
91. ह्रीं देवाय नमः 92. ह्रीं महादेवाय नमः 93. ह्रीं अव्ययाय नमः
94. ह्रीं हरये नमः 95. ह्रीं पुष्पदन्तभिदे नमः 96. ह्रीं भगनेत्रभिदे नमः
97. ह्रीं अपवर्गप्रदाय नमः 98. ह्रीं अव्यग्राय नमः 99. ह्रीं अव्यक्ताय नमः
100. ह्रीं अनन्ताय नमः 101. ह्रीं दक्षाध्वरहराय नमः 102. ह्रीं सहस्राक्षाय नमः
103. ह्रीं तारकाय नमः 104. ह्रीं हराय नमः 105. ह्रीं सहस्रपदे नमः
106. ह्रीं श्रीपरमेश्वराय नमः 107. ह्रीं व्रताधिपाय नमः 108. ह्रीं जगते नमः

धूपम्- भगवान् को धूप दिखायें

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धमुत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः धूपं आघ्रापयामि।

दीपम्- भगवान् को दीपक दिखायें।

भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद् घोराद्दीपज्योतिर्नमोऽस्तु ते॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः प्रत्यक्ष-दीपं सन्दर्शयामि।

ह्रीं नमः शिवाय यह मन्त्र बोलकर हाथ धोलें।

नैवेद्यम्- भोग (प्रसाद) को भगवान् के सामने रखें।

भावयुक्तं विशुद्धं वै द्रव्यशुद्धं च निर्मलम्।
भक्तिवृत्तिसमायुक्तं स्वहस्तेनैव निर्मितम्॥
सरसं परिपक्वं च पायसादि समन्वितम्।
नैवेद्यं गृह्यतां देव गव्यसिद्धं सुसात्विकम्॥

सांगाय सपरिवाराय सायुधाय सशक्तिकाय सवाहनाय सपरिकराय अंगावरणदेवतासहिताय सर्वदेवमयाय सर्वाभीष्टफलप्रदाय भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः नैवेद्यं

निवेदयामि। नैवेद्य पर पवित्र जल से प्रोक्षण (छिड़काव) कर चन्दन और पुष्प चढ़ाकर तथा धेनुमुद्रा से अमृतीकरण कर योनिमुद्रा दिखायें और घण्टा बजा दें। पश्चात् ग्रासमुद्रा को दिखायें।

प्राणाय स्वाहा। अपानाय स्वाहा। व्यानाय स्वाहा।
उदानाय स्वाहा। समानाय स्वाहा।

फिर अग्रलिखित वाक्य पढ़ते हुए आचमनी से चार बार जल चढाएं-
मध्ये मध्ये पानीयं, उत्तरापोशनार्थं, हस्तप्रक्षालनार्थं, पुनः आचमनीय जलं च समर्पयामि।

उद्वर्तनम्- उबटन (घृताक्त नैवेद्य के कारण भगवान् की अंगुलियों में स्थित चिकनाई की सफाई के लिए चन्दनादि का छिड़काव करें)

स्नेहदिग्धकरार्थं यत् शोधनाय प्रकल्पितम्।
प्रीयतां हे महादेव! स्वीकृत्य चन्दनं विभो!॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः उद्वर्तनार्थे चन्दनं विलेपयामि।

ऋतुफलम्-

दाडिमं दृढबीजं च रसालं कदलीफलम्।
स्वीकृत्यैतानि देवेश! जीवनं सफलं कुरु॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः ऋतुफलानि समर्पयामि।

ताम्बूलम्- पान के पत्ते पर लवंग, इलायची, सुपारी रखकर निवेदन करें।

एला-लवंग संयुक्तं पूगीफल-समन्वितम्।

ताम्बूलं गृह्यतां देव! सौख्य-समृद्धि-कारकम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः मुख शुद्ध्यर्थं ताम्बूलं समर्पयामि।

दक्षिणाम्-

दक्षिणा यज्ञभार्यास्ति यज्ञरूपोऽसि वै शिव।

पूजान्ते स्वीकुरु त्वं भा दिव्यां सर्वफलप्रदाम्॥

भगवते साम्बसदाशिवाय चिन्तामणि-पार्थिवेश्वराय नमो नमः साद्गुण्यार्थं सकलाभीष्ट फल प्राप्त्यर्थं द्रव्यदक्षिणां समर्पयामि।

तर्पणम्- जल में अक्षत डाल कर अग्रलिखित एक एक नाम को बोलकर जल को किसी पात्र में छोड़ें।

1. ह्रीं भवं देवं तर्पयामि
2. ह्रीं शर्वं देवं तर्पयामि
3. ह्रीं ईशानं देवं तर्पयामि
4. ह्रीं पशुपतिं देवं तर्पयामि
5. ह्रीं उग्रं देवं तर्पयामि
6. ह्रीं रुद्रं देवं तर्पयामि
7. ह्रीं भीमं देवं तर्पयामि
8. ह्रीं महान्तं देवं तर्पयामि

1. ह्रीं भवस्व देवस्य पत्नीं तर्पयामि
2. ह्रीं शर्वस्य देवस्य पत्नीं तर्पयामि
2. ह्रीं ईशानस्य देवस्य पत्नीं तर्पयामि
4. ह्रीं पशुपतेर्देवस्य पत्नीं तर्पयामि
3. ह्रीं उग्रस्य देवस्य पत्नीं तर्पयामि
6. ह्रीं रुद्रस्य देवस्य पत्नीं तर्पयामि
4. ह्रीं भीमस्य देवस्य पत्नीं तर्पयामि
8. ह्रीं महतो देवस्य पत्नीं तर्पयामि

